International Journal of Sanskrit Research 2017; 4(3): 70-73

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(3): 70-73
© 2018 IJSR
www.anantaajournal.com
Received: 14-03-2018
Accepted: 15-04-2018

**सुब्रह्मण्य भट्टः**
सहायकप्राध्यापकः श्री चामराजेन्द्र सर्कारि संस्कृत कालेज्, बेङ्गलूरु-१८

Correspondence
**सुब्रह्मण्य भट्टः**
सहायकप्राध्यापकः श्री चामराजेन्द्र सर्कारि संस्कृत कालेज्, बेङ्गलूरु-१८

# ज्ञानकर्मसमुच्चयविचारः

## सुब्रह्मण्य भट्टः

प्रस्तावना

(अत्र ज्ञानकर्मसमुच्चयः मोक्षसाधनं भवति वा न वा इति विचार्य, ज्ञानकर्मसमुचयस्य मोक्षकारणत्वं निराकरोति लेखकः।)

अत्र उपनिषत्सु श्रूयते, “तमेव विदित्वा अतिमृत्युमेति नान्यःपन्था विद्यतेऽयनाय” (श्वेता-३-८) ब्रह्म विदित्वा मृत्युशब्दोपलक्षितसंसारात् मुच्यते। न साधनान्तरं विद्यते। “न कर्मणा न प्रजया धनेन” (महाना-८-१४) कर्मणा-श्रुतिप्रतिपादितकर्मचरणेन, प्रजया-सन्तानोत्पादनेन धनेन मोक्षः न प्राप्यते। “नास्त्यकृतः कृतेन” ( मुण्ड-१-२-१२) नित्यः मोक्षः अनित्येन कर्मणा न सिध्यति। “एतावदरे खलु अमृतत्वम्” ( बृह-४-५-१५) हे मैत्रेयी एतावत् नाम नेति नेति इति अद्वैतात्मदर्शनम् मोक्षसाधनम् इति। स्मृतयः अपि –

> कर्मणा बध्यते जन्तुः विद्यया च विमुच्यते।
> तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥ इति ॥

कर्मणा- श्रुतिप्रतिपादित कर्माचरणेन, जन्तुः – जीवः, बध्यते – बन्धनं प्रप्नोति।, विद्यया – ज्ञानेन, विमुच्यते - मोक्षं प्राप्नोति। तस्मात् – अतः कारणात्, पारदर्शिनः यतयः– ज्ञानिनः संन्यासिनः, कर्म- श्रुतिनिरूपितं कर्म, न कुर्वन्ति- न आचरन्ति। इति प्रतिपदयन्ति।

ननु अत्र सर्वत्र कर्मशब्देन केवलकर्म एव निरूपितम्, न ज्ञानसहितं कर्म निरूपितम्। अतः केवल कर्मणः एव मोक्षसाधनत्वं न युज्यते इति अवगम्यते। अतः ज्ञानसहितकर्मणः मोक्षसाधनत्वाङ्गीकरे न कोऽपि दोषः सम्भवति।

ननु ज्ञानसहितकर्मणः निरूपणं न द्रश्यते इति चेत्। न। उपलभ्यते च प्रमाणं ईशवास्ये यथा “अन्ध तमः प्रविशन्ति ये अविद्याम् उपासते। तत भूय इव ते तमो य उ विद्यायां रताः ॥ ( ईशा-९) इति अविद्यायाः विद्याः निन्दां कृत्वा,” विद्यां च अविद्यां च यः तत् वेद उभयं सह।

अविद्यया मृत्युं तीर्त्वा विधया अमृतम् अश्नुते ॥ (ईशा-११) इति ज्ञानाकर्मणोः मोक्षसाधनत्वम् निरूपितम्। अत्र इदं वक्तव्यम्। न ब्रह्मप्राप्तिः एव मोक्षः इति वक्तुं शक्यते। तस्य पूर्वम् अपि प्राप्तत्वात्। न च अविद्यानिवृत्तिमात्रम् अपि न मोक्षः। तस्य अभावरूपत्वात् पुरुषार्थत्वं न युज्यते। अतः अविद्यानिवृत्तिपूर्वकब्रह्मप्रप्तिः मोक्षः इति अङ्गीकर्तव्यम्। अत्र साधनद्वयमपि वक्तव्यम्। अत्र अविद्यायाः निवृत्तिं प्रति कर्मसाधनत्वम्, ज्ञानम् ब्रह्मप्राप्तये साधनम् इति अङ्गीकृते युक्तं भवति। अतः अत्र एवं व्यवस्था उपपद्यते। यथा" विद्यया अन्या अविधा, नाम कर्म इत्यर्थः, मृत्युं नाम क्षयम् इत्यर्थः, अतः कर्मणः संसारनिवृत्तौ उपयोगः सम्भवति। ब्रह्मणः आत्मरूपत्वात् नित्यम् एव प्राप्तं, तथाऽपि कण्ठगतचामीकरवत् तिरोहितम्। अतः अत्र अविद्यायाः निवृत्तिः एब कार्या, अतः अविद्यानिवृत्तौ विद्यायाः उपयोगः सम्भवति। अतः एव उक्तम् "विद्यया अमृतमश्नुते" इति (ईशा-११)। ननु अत्र शाङ्करभाष्ये" यत एवमतः विद्यां च अविद्यां च देवताज्ञानं कर्मच इत्यर्थः। त तदेतदुभयं सह एकेन पुरुषेण अनुष्ठेयं वेद तस्य एवं समुच्चयकारिणा एव एकैकपुरुषार्थसम्बन्धः क्रमेण स्यात् इति उच्यते। अविद्यया – कर्मणा अग्निहोत्रादिना, मृत्युं-स्वाभाविकं कर्म ज्ञानं च मृत्युशब्दवाच्यम् उभयं, तीर्त्वा – अतिक्रम्य, विद्यया देवतात्मज्ञानेन, अमृतम्-देवतात्मभावम्, अश्नुते- प्राप्नोति। तत् हि अमृतत्वमुच्यते तदेवतात्मगमनम्" [1] इति निरूपितम् इति चेत्। तदयुक्तम्। एवमङ्गीकारे उपक्रस्य आनुगुण्यं न सम्भति। यथा उपक्रमे "ईष्टे- इतीट् तेन ईशा, ईशिता परमेश्वरः परमात्मा सर्वस्य" [2] इति परमात्मनः एव उपक्रमविषयत्वात्, मध्ये देवताज्ञानस्य निरूपणं उपक्रमानुगुणं न भवति। तदुक्तं तत्वप्रदीपिकायाम् "तदयुक्तम्, प्रक्रमाननुगुणत्वात्, ईशावास्ये परमात्मनः प्रक्रान्तत्वात्" [3] इति। अपि च प्रमाणान्तरम् अपि उपलभ्यते। यथा "तेनैति ब्रह्मवित् पुण्यकृत् तैजसः च" (बृह- ४-४-९) इति। श्रुत्यर्थः तु –यः तैजसः – योगी, ब्रह्मवित् पुण्यकृत् च भवति, असौ तेन- उत्तरमार्गेण, एति – गच्छति इति। अत्र ब्रह्मवित्पुण्यकृत्वयोः एकपुरुषसम्बन्धः निरूप्यते। अपि च "सत्येन लभ्यः तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्" (मुण्ड-३-१-५) इति सत्यस्य, तपसः, ब्रह्मचर्यस्य च सम्बन्धं सम्यग्ज्ञानस्य निरूप्यते। स्मृतिः अपि एवं निरूपयति।

> तपो विद्या च विप्रस्य निःश्रेयसकरं परम्।
> तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते ॥ (मनु-१२-१०४)
> तत्प्राप्तिहेतुः ज्ञानं च कर्म च उक्तं महामुने।
> यथा अन्नं मधुसंयुक्तं मधु च अन्नेन संयुतम्।
> एवं तपः च विद्या च संयुक्तं भेषजं महत् ॥ (दक्ष)

एवं कण्ठतः एव श्रुतिस्मृतिषु समुच्चयस्य प्रतिपादनात्, कर्मनिन्दापराणां वाक्यानां केवलकर्मनिन्दा परत्वं युक्तम् इति भाति। ननु ज्ञानं मोक्षस्य साक्षात् साधनं भवति, कर्म तु पापनिवारणद्वारा परम्परया साधनं भवति इति चेत्। न। कर्मणां साक्षात् मोक्षसाधनत्वे प्राप्ते परम्परया साधनत्वाङ्गीकारे प्राप्तान्वयस्य बाधः स्यात्। ननु अत्र "नान्यः पन्था विद्यतेऽयनाय"( श्वेता-३-८) इत्यादिश्रुतेः बाधः समानम् इति चेत्। उच्यते। अत्र निषेधस्य प्राप्तान्वयबाधं विना अपि केवलकर्मपरतया सङ्कोचः उपपद्यते। ननु अत्र ज्ञानकर्मसमुचयपरवाक्येषु अन्वयबाधः एव युज्यते। यतः "विविदिषन्ति ब्राह्मणाः" (बृह-४-४-२२) "योगिनः कर्मकुर्वन्ति सङ्गं त्यक्त्वा आत्मशुद्धये" (भग-४-११) इयादि श्रुतिस्मृतिषु कर्मणः परम्परया एव साधनत्वाङ्गीकारात् इति चेत्। न। मोक्षस्य केलज्ञानस्य साधनत्वे "ततो भूय इव ते तमो य उ विद्यायां रताः" (ईशा-९) इति श्रुतौ केवलविद्यायाः निन्दा न उपपद्यते। अपि च केवलविद्यविषयकश्रुतिनां कर्मनिषेधपरत्वं अपि न सम्भवति। तेषां आग्नेयादि यागेषु फलं प्रति साक्षात् समप्रधानता निषिध्यते, तथा अत्र अपि कर्मसु मोक्षं प्रति समप्रधानता एव निषेधस्य विषयः

भवति। अङ्गीक्रियते च कर्मणां परम्परया मोक्षसाधनत्वम्। अत्र परम्परा नाम साधनस्य उपकारः एव। न करणस्य उत्पादनं। तदुक्तं तत्वप्रदीपिकायां," व्यवधानत्वं च करणोपकारः, न तदुत्पाद्कत्वम्" [4] इति। ननु एवं मोक्षस्य कर्मसाधनत्वाङ्गीकारे "तद्यथा इह" (छान्दोग्य-८-१-६) इत्यादिश्रुत्या, "यत् कृतकं तदनित्यम्" इति न्यायात् अनित्यत्वं स्यात् इति चेत्। न। कर्मणः बन्धध्वंसे एव उपयोगात्, बन्धध्वंसः कृतकः, नित्यः अपि, अतः न दोषः। अन्यथा ध्वस्तबन्धस्य पुनरापत्तिः। तथा च "वेदानुवचनेन विविदिषन्ति ब्राह्मणाः" (बृह-४-४-२२) इत्यत्र "सन्" प्रत्ययेन इच्छा अवगम्यते, किन्तु इच्छया सह करणत्वप्रतिपादक तृतीया विभक्तेः अन्वयः न सम्भवति। अतः "अश्वेन जिगमिषति" इत्यत्र यथा "अश्व" शब्देन सह करणत्वप्रतिपादक तृतीयायाः अन्वयः, तथा अत्र अपि "कर्म" शब्देन सह तृतीयायाः अन्वयः अङ्गीकर्तव्यः, न कर्मणां करणोपकारकत्वम् अङ्गीकर्तुं शक्यते। एवम् अङ्गीकारे करणत्वप्रतिपादकतृतीया श्रुतेः करणोपकरकत्वे मुख्यार्थबाधप्रसङ्गः इति चेत्। न। "यज्ञेन विविदिषन्ति" इत्यत्र अपूर्वत्वात् विधिः अङ्गीक्रियते। अतः विधिप्रतिपादकवाक्ये विद्यमानानां पदानां अर्थः भावनायां प्रथमतः अन्वयं प्राप्नुवन्ति। ततः किं, केन, कथम् इति आकांक्षायाम् इतरेषां पदानां अन्वयः सम्भवति। अत्र धात्वर्थस्य वेदनस्य असमीहितत्वात् साध्यं न सम्भवति, अतः मोक्षः एव साध्यं भवति। अत्र धात्वर्थस्य अन्वयः कथम् इति चेत्। मोक्षोद्देशेन प्रवृत्ता या भावनाभाव्यत्वलक्षणकरणभावत्वेन धात्वर्थः अन्वेति। एवं धत्वर्थस्य करणत्वेन अन्वये, करणत्वाकांक्षायां यज्ञादीनां अन्वयः न सम्भवति। किन्तु कारणभावनापेक्षितकरणे उपकारद्वारेण तेषां सम्बन्धः। अतः यज्ञादिभिः उपकृत्य ज्ञानेन मोक्षं भावायेत् "इति वाक्यार्थः सिध्यति। ननु अत्र "शन्तो दान्तः" (बृह-४-१-२१) इत्यादिवाक्यश्रवणेन एव इतिकर्तव्यताकांक्षा शाम्यति। अतः यज्ञादीनां इतिकर्तव्या न सम्भवति। अतः विधेय धात्वर्थस्य करणतायाम् एव यज्ञादीनाम् अन्ययः इति चेत्। न। उभयोः अपि इतिकर्तव्यतात्वेन एव प्रयाजानुयाजादिवत् अन्वयः सिध्यति। एवं बाधकस्य अभावात् साधकस्य प्रमाणस्य सत्वात् ज्ञानकर्मसमुच्चयः एव मोक्षसाधनम् इति सिध्यति। इति पूर्वपक्षः।

अत्र सिद्धन्तः। "विविदिषन्ति यज्ञेन" (बृह-४-४-२२) इत्यत्र तृतीया श्रुत्या एव विधेय विज्ञानस्य करणत्वेन अन्वयः सिध्यति। यज्ञादीनां फलोपकार्यत्वकल्पने श्रुत्यादिप्रणबाधप्रसङ्गात्। ननु प्रकरणप्रमाणेन इतिकर्तव्यतात्वप्राप्तिः इति न समीचीनम्। प्रकरणप्रमाणं सामान्यतः अङ्गानां निरूपणं कृत्वा निवर्तते। अङ्गानां विशेषाकांक्षायां श्रुत्यादयः एव प्रमाणानि भवन्ति। अतः "व्रीहिभिः यजेत" इतिवत् करणस्वरूपनिरूपकतया यज्ञादीनां करणत्वं तृतीया श्रुत्या निश्चीयते। यज्ञादिभिः उपकृत्य इति अङ्गीकारे अध्याहारेण सह योजनाप्रसङ्गः। अत्र श्रुतौ "उपकृत्य" इति अश्रवणात्। ननु यज्ञादीनां श्रवणादिवत् साक्षात् साधनत्वस्य अश्रवणात् कथं करणत्वोपपत्तिः इति चेत्। न। परम्परा साधनेषु अपि लेके वेदे च करणत्वस्य प्रसिद्धत्वात्। यथा "काष्ठैः पचति" इत्यत्र काष्ठस्य साक्षात् पाककरणत्वं नास्ति ज्वालारूपव्यवधानस्य विद्यमानत्वात्, तथाऽपि करणत्वं प्रसिद्धम्। वेदे तु अपूर्वरूपव्यवधानस्य विद्यमानत्वे अपि यागस्य साधनत्वं प्रसिद्धम्। तथा इह अपि मोक्षप्रतिबन्धस्य पापस्य शोधनरूपव्यवधानसत्वे अपि यज्ञादीनां करणत्वप्रसिद्धिः सम्भवति।

अत्र यदुक्तं पूर्वपक्षिणा, ईशावास्ये परमात्मोपक्रमविरोधात् देवता विज्ञानास्य निन्दा, ज्ञानकर्मसमुच्चयः उपपद्यते इति। तदसुन्दरम् इति भाति। निन्दायाः देवताविज्ञानपरत्वम् अपि उपपद्यते। प्रकरणप्रमाणस्य बाधः बलीयसा यज्ञेन इति तृतीया श्रुत्या बाधितं भवति। अपि च अत्र क्रमसमुच्चयः अपि निरूपयितुं शक्यते "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमितमश्नुते" इति पूर्वापरभावस्य श्रवणात्। "सह वेद" इति ज्ञने एव सहभावः श्रूयते, न फलविषये। उपक्रमानुरोधेन परमात्मविषयत्वे अपि अपरिपक्वज्ञानविषयत्वेन अपि उपपद्यते। तथा च श्रुत्यर्थः एवं उक्तं तत्वप्रदीपिकायाम्" विद्यां-

परिपक्वात्मज्ञानलक्षणाम्, अविद्यां- कर्मलक्षणाम्, यः वेद- उपयोपायभेदेन
वेद, सः पुरुषः, अविद्यया- कर्मलक्षणया, विद्योत्पत्तिप्रतिबन्धकं मृत्युपदवेदनीयं पापं तीर्त्वा, विद्यया- परिपक्वसाक्षात्कारलक्षणया, अमृतं – निर्वाणम्, अश्नुते इति" [5]।

आहत्य इदमत्र तात्पर्यम्। यावत् विद्यायाः परिपाकं न भवति तावय् कर्म अनुष्टेयम्। परिपक्वा विद्या कर्मनिरपेक्ष्य एव मोक्षं साधयति। समुच्चयवादिना अपि काम्यकर्मणः ज्ञानेन सह समुच्चयः निरूपयितं न शक्यते, तस्य मुमुक्षुणा त्यक्तत्वात्। नित्यनैमित्तिककर्मभिः अपि चमुच्चय प्रतिपादयितुं न शक्यते। यतः वर्णाश्रमं अधिकृत्य विहितानां तेषां उत्कर्षापकर्षवत्वात्, फले अपि उकर्षापकर्षवत्वात्, मोक्षरूपफले तेषां साधनत्वाङ्गीकरे यथा कर्मफलस्य अनित्यत्वं तथा मोक्षफलस्य अपि अनित्यत्वप्रसङ्गात्। अतः ज्ञानम् एकम् एव मोक्षसाधनम् इति अङ्गीकर्तव्यम्। "सत्येन लभ्यः" मुण्ड-३-१-५) इत्यादिषु अपि सत्यादीनां ज्ञानं प्रत्येव साधनत्वमङ्गीकर्तव्यम्। "तेनैतिब्रह्मवित् पुण्यकृत्" (बृह- ४-४-९) इति कार्यब्रह्मगोचरमार्गविषयः एव। तथा च उदाहृतस्मृतयः अपि क्रमसमुच्चयपरकाः न समसमुच्चयपरकाः इति श्रुत्यनुसारेण एव एतेषां तात्पर्यं अङ्गीकर्तव्यम् इति सिध्यति।

<u>संदर्भ</u>


1. उपनिषद्भाष्यम्. खण्ड-१. महेश-अनुसन्धान-संस्थानम्. (श्री दक्षिणामूर्तिमठप्रकाशन)२००४.
2. उपनिषद्भाष्यम्. खण्ड-१. पूर्वोक्तम्.
3. तत्वप्रदीपिका. पृ-सं-५४२ चौखम्बा विद्याभवन वारणासि.२००५
4. तत्वप्रदीपिका. पृ-सं-५४४ पूर्वोक्तम्.
5. तत्वप्रदीपिका. पृ-सं-५४८ पूर्वोक्तम्.


सङ्केताक्षरसूची

1. ईषा- ईशावास्योपनिषत्
2. छान्दो-छान्दोग्योपनोषत्.
3. बृह-बृहदारण्यकोपनिषत्.
4. श्वेता- स्वेताश्वतरोपनिषत्.
5. मुण्ड- मुण्डाकोपनिषत्.
6. भग-भगवद्गीता
7. मनु- मनुस्मृतिः.
8. दक्ष- दक्षस्मृतिः
9. महाना- महानारायणोपनिषत्.